कुम्भसमुद्भवम्



NS
4 2

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुमुक्षु भवन वेद वेदाङ्ग पुस्तकालय
वाराणसी।
आगत क्रमांक...
दिनांक...

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तरप्रदेशसंस्कृताकादमीप्रकाशन

उत्तर प्रदेश भाषा निधि के सौजन्य से

कुम्भसमुद्भवम्

(अकादम्याः संस्कृतसम्मेलनावसरेऽभिनीतम्)

लेखकः—

श्रीहीरालालपाण्डेयः

साहित्यविभागाध्यक्षः

प्रयागस्थश्रीमहानिर्वाणिवेदविद्यालयस्य

प्रकाशकः—

उत्तरप्रदेशसंस्कृताकादमी लखनऊस्था

(लखनऊ)

२०३९ वैक्रमाब्दः १९८२ खैस्ताब्दः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकाशकः स्वत्वाधिकारी च—

निदेशकः लक्ष्मणपुरस्थोत्तरप्रदेशसंस्कृताकादम्याः

प्राप्तिस्थानम्—

विक्रयविभागः,
उत्तरप्रदेशसंस्कृताकादमी
लखनऊ।

प्रथमसंस्करणम् : १०००

मूल्यम्—५-०० रुप्यकाणि

मुद्रक—
मधुसूदन प्रेस
भदैनी, वाराणसी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवेदनम्

प्रयागीयार्धकुम्भपर्वणि

प्रथमस्मरणीयस्य श्रीदशनामनागासंन्यासिनां श्रीपञ्चायती अखाडा-निर्वाणिपिसंस्था तस्य महाविद्यालयस्य प्राचार्यश्रीमानिकचन्द्रमिश्र महोदयस्य सोत्साहयोगेन विद्यालयस्य प्रबन्धकारिभिः सोत्साह-समर्थनेन विद्यालयाध्यापकच्छात्रसक्रियसहयोगप्रदानेन अहमदाबाद-गीतामन्दिरशिविरे श्रीमहामण्डलेश्वरश्रीमङ्गलानन्दजीमहाराजाना-मुद्घाटकत्वेऽभिनीतमिदं श्रीहीरालालपाण्डेयप्रणीतं नाटक मतीवावसरानुकूलं धार्मिकजनावर्जकं जनरुचिप्रोत्साहकञ्च सम्यक् सम्पन्नम् ।

अहमपि त्रिदिनेषु उत्तरप्रदेशसंस्कृताकादम्याः तस्मिन्समारोहे आद्यन्ततः उपातिष्ठम् । इतरकार्यक्रमसहिते एतस्मिन् मञ्चने अतीव प्रमोदञ्चान्वभवम् ।

एतदर्थं च उक्तमहामण्डलेश्वरेभ्यः निर्वाणिसंस्कृतमहाविद्यालयस्य प्राचार्यशिक्षकच्छात्रकर्मचारिभ्योऽस्य दृश्यकाव्यस्य लेखकेभ्यः साहित्य-ज्यौतिषाचार्योपाधिभाग्भ्यः श्रीहीरालालपाण्डेयेभ्यश्च भूयो भूयः अकादमीपक्षेण कृतज्ञतां विज्ञापयन् साधुवादान् समर्पयामि । अस्य सर्वकर्त्तारः श्रीओङ्कारनाथद्विवेदिमहाभागा अपि साधुवादार्हाः ।

अस्य मुद्रकाः मधुसूदनप्रेससंस्थापकाः साहित्यादिविविधविद्या-मर्मज्ञाः श्रीमत्पण्डितमधुसूदनशास्त्रिमहाभागा अपि अस्माकं कृत-ज्ञतानिवेदनार्हा, येषां बहुमूल्यसहयोगेन सत्प्रयासेन सोत्साहमुद्रण-विधानेन एतस्य मञ्चितलघुनाटकस्याधुना प्रकाशनं सम्पन्नम । पुनरपि सर्वान् प्रति कृतज्ञतां निवेदयति—

निवेदक

आचार्यकरुणापतित्रिपाठी

अध्यक्षः

उत्तरप्रदेशसंस्कृताकादम्या

लक्ष्मणपुरस्थायाः

कार्तिकी पूर्णिमा,

संवत् : २०३९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अमृतप्राशनम्

आसीत् पौषमासः, समाचारपत्रेषु कुम्भपर्वविषयिणी चर्चा सततं चलति स्म। अकस्मात् श्रीमहानिर्वाणवेदविद्यालस्य प्राचार्यैः श्रीमानिकचन्द्रमिश्रमहाभागैरहमुक्तः —"किं कुर्वन्ति भवन्तः सम्प्रत्यर्धकुम्भपर्वणि अस्मद्विद्यालयेन किमपि ? नूतनं दृश्यकाव्यं यच्चावसरानुकूलं धर्मप्रचारकं सर्वजनबोधगम्यं च भवेत् तत्करणीयम्,, इत्येतदर्धकुम्भसमुद्भवं नाम नाटकं भवद्भिर्लेख्यं यत्र प्रयागस्य वैशद्यं माहात्म्यमवश्यं भवेत्। एतदेवाधारीकृत्याऽस्या रचनायाः निर्माणम्।

महाविद्यालयः श्रीदशनामनागासन्यासिनां श्रीपंचायती अखाड़ा-महानिर्वाणी द्वारा प्रचलति। येषां प्रयागकुम्पर्वणि प्रथमं स्मरणं भवति। तेषां शिविर एव एतदभिनेयमित्यपि तैरभिहितम्। अस्मत् सहयोगिशिक्षकैः सोत्साहैः छात्रैश्चाऽभिनेतुं समर्थितम्।

दैवात् "उतर-प्रदेश-संस्कृता-कादमी-संस्थायाः" कार्यकारिसदस्याः आचार्यप्रवराः श्रीओंकारनाथद्विवेदिनः प्रयागे संस्कृत-सम्मेलनकरणाय निवेदितवन्तः। प्राचार्यैरपि तेषां प्रस्तावः स्वीकृतः। अस्मिन् सम्मेलने कुम्भसमुद्भवनाटकस्य मञ्चनमवश्यं स्यादिति प्राचार्यैः पुनरप्यहमुक्तः। इत्थं पौराणिकीं गाथामाश्रित्य नाटकस्यास्य रचनायांसंलग्नोऽभवम्। शीघ्रतावशाद् द्वित्रैरेवदिनैः समाप्तिमगात्। त्वरायां त्रुटिरवश्यं भाविनी भवति। क्षन्तव्या विद्वद्भिः। सौभाग्यवशात् १९८२ वर्षस्य जनवरी मासस्य २७ तारिकायाँ सायं षड्वादने अहमदावादस्य-गीतामन्दिरशिविरे श्रीमहामण्डलेश्वराणां १०८ श्रीमङ्गलानन्दजीमहाराजानामुद्घाटकत्वे उ० प्र० संस्कृताकादमी-अध्यक्षाणां करुणावरुणालयानां श्रीमतां करुणापतित्रिपाठिनामाध्यक्ष्ये विद्यालयीयच्छात्रैरभिनीतश्च।

अस्य नाटकस्य अप्रकाशनं श्रुत्वा प्रसन्नचेतोभिः श्रीमत्त्रिपाठिवर्य्यैः संस्कृताकादमीद्वारा नाटकस्यास्य प्रकाशन-घोषणा विहितेति।

संन्तोषमावहामि प्रकाशनात्पूर्वमेव वारद्वयं नाटकस्यास्य मञ्चनं जातम्।

अतः सर्वान् सहृदयान् प्रति कृतज्ञतां प्रकाशयन् वाञ्छामि शन्तनोतु शम्भुरिति।

हीरालालपाण्डेयस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समर्पणम्

विद्वन्मूर्धन्यकाव्यपीयूषरसास्वादकुशलसर्वविधसाहित्यरचनाप्रवीणसहृदयधुरीणानां श्रीमतां परमश्रद्धेयानाम् पाणिपङ्कजयोः सादरं समर्प्यते--



श्रीमन्मानिकचन्द्रमिश्रविदुषां प्रख्यैव यत्सम्बलम्,
प्राकाश्यं भुवि नीयते हि तदिदं कुम्भोदभवं नाटकम्।
श्रावं श्रावमहं नतेन शिरसा कार्त्तार्थ्यमावेदयन्,
आशासे करुणापतेः करपुटे संल्लप्स्यते धन्यताम्॥

समर्पकः
हीरालालपाण्डेयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साहित्यज्यौतिषाचार्यएम०ए०विरुदावलिभाग्भिः प्रयागस्थे श्री
महानिर्वाणवेदविद्यालये साहित्यविभागाध्यक्षपदमलंकुर्वद्भिः
श्रीहीरालाल पाण्डेयैः प्रणीतम्

कुम्भसमुद्भवं नाटकम्

। समवकारः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुम्भसमुद्भवम्

प्रस्तावना

अथ प्रथमोऽङ्कः

समूहगीतिः

इयं यत्र गङ्गा यमुना च यत्र,
सितासित सुधारा, सुधाधारधारा।
निराधार नीराजनकृत्यवीरा,
सुधीरा वहन्ती शुभा वारिधारा। इयं···॥

तीर्थाधिपस्य प्रयागस्य नूनं,-
महिमा विशिष्टो विशिष्टा समाख्या।
लीना सरस्वतिप्रता हि यस्मात्,
नदीत्रयगतिः सङ्गतिः सङ्गमाख्या॥ इयं ··॥

भरद्वाजवासोऽक्षयवटनिवासो, -
महादेव-देवस्य वासोऽपि यत्र।
वासुकीनागो दिशति शुभं नः,
नित्योऽभिनन्द्यो माधवदेवः॥ इयं···॥

माघे - अमायां महिमानमस्य,
दृष्ट्वा प्रमुग्धो हीराविशेषः।
साञ्जलि प्रणमन् वाञ्छति नूनं,
शरणं स भूयात् तीर्थाधिराजः॥ इयं···॥

[नान्द्यन्ते]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूत्रधार :—

गङ्गा यत्र सरस्वती च विमला नीलाञ्चला भानुजा,
मान्याऽसौ मुनिवृन्दरम्यवसतिः श्रीवासुकीवासभूः ।।
संख्यातीतयतीशवन्दिततनुः नित्योऽक्षयः मूर्तिमान्,
सोऽयं मे भवतात् सदा शिवकरस्तीर्थाधिपः श्रेयसे ।।१।।

अपि च —

शैत्योष्णपूर्णैः सुखदैः प्रवाहैः,
सदाऽभिषेकः क्रियते च येन ।
अशेषतीर्थावलिभ्राजमानः,
तीर्थाधिराजो जयति प्रयागः ।।२।।

अपि च—

विमलमासनमास्थितया यया,
स्थितिमतां जगतां क्रियते भृतिः ।
मधुरमूर्तिरियं शिवसङ्गता,
भगवती भवतात्शुभदा सदा ।।३।।

अहो ! समहान् प्रभोदावसरोऽयम्-अमन्दानन्दः । श्रीपंचायती-अखाड़ामहानिर्वाणीद्वारा संचालितस्य श्रीमहानिर्वाणवेदविद्यालयस्य अध्यक्षैः विद्याधर्मसंस्कृतप्रचारपरैः श्रीमद्भिः महन्तैः ओंकारपुरीभिः आदिष्टोऽस्मि यदद्य अस्यां परिषदि समुपस्थिताः महात्मानः सभ्याश्च केनचिदभिनवप्रणीतेनाभिनयेन सभाजनीया इति ।

अथ चिन्तयामि तावत् । यतः—

असंख्यातैर्मान्यैः प्रणयनपरैः काव्यरसिकैः.
समभ्यस्तो मार्गोऽनवमितिधिया स्यात्परिहृतः ।
तदा लोके हासो भवति जनतायाः विमुखता,
ततोऽभ्यस्तं तत्वं नवमपि पुराणं विचिनुमः ।।४।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हन्त ! साधु चिन्तितम् । अस्मद्विद्यालयीयैः साहित्यविभागाध्यक्षैः श्रीहीरालालपाण्डेयमहोदयैः प्रणीतमस्ति कुम्भसमुद्भवं नाम नवं नाटकम् । नूनं तदीयमभिनयं दर्शं दर्शं मोदमेष्यन्ति श्रीमन्त इति । यतः—

अभिनवा कविता वनिता तथा,
नवनवं बहुरूपक रूपकम् ।
श्रवणदर्शनतृप्तिकरं परं,
नवनवाऽभिनये निपुणा वयम् ॥५॥

अथ वयस्यमाहूय संगीतकं करोमि । भाव । भाव । शीघ्रं शीघ्रमागम्यताम् । हीयते हि अत्र भवतां समाराधनवेला ।

॥ पारिपार्श्विकप्रवेशः ॥

पारिपार्श्विक :—

वयस्य ! अयमहमागत एव । आदिशतु वयस्यः साम्प्रतिकं करणीयम् । अथवा किमादेशेन ।

इङ्गितैरेव सर्वेषामस्माकं ते मनोरथाः ।
प्रकाशपदवीभाजः फलसन्धानतत्पराः ॥६॥

तद् वयस्य, सविनयं गीयते-
शिशिर कमला कामिनी रे ॥
शिशिर-दिवसो मिहिर-शिशिरः,
शिशिर रजनी-रमण शिशिरः ।
शिशिर-शोभास्थायिनी रे ॥ शिशिर कमला···॥
शिशिरमधुरा लसति वेला,
शिशिरमृदुमय-मदनखेला ।
शिशिर-सुखदा-यामिनी रे ॥ शिशिर कमला···॥
शिशिरवायुः वहति सततम्,
शिशिरस्रोतः भवति विरतम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिशिरक्षणदा भामिनी रे ।। शिशिर कमला···।।

सूत्रधारः— साधु भाव । साधु । अनेन शिशिरर्तु सम्बन्धिना तव गानेन विस्मृतात्मास्मि संवृत्तः । तत् साम्प्रतिकं करणीयं मन्त्रयतु भवान् । पारिपार्श्विकः भवदादेशदेव –

अतः परं सत्समयानुरूपम्,
प्रयोगविज्ञान-समन्वितं यत् ।
समागतानां महतां पुरस्तात्,
प्रयुज्यते कुम्भसमुद्भवं तत् ।।७।।

नेपथ्ये—

अमी लोकपालाः देवराजं द्रष्टुं प्रस्थिताः सन्ति ।

सूत्रधारः— अये । अमी लोकपालाः इत एवाभिगच्छन्ति । साधयामस्तावत् ।

इति प्रस्तावना ।

ततः सलोकपालः इन्द्रः सिंहासनारूढः प्रविशति ।

प्रथमो वन्दी—

शतमखपरिपूतो वेदगीतोऽतिविद्यः,
दनुजदवदवाग्निः सेवितो लोकपालैः ।
समरसमरसोऽसौ साधुमान्यो वदान्यः,
जयति सुरवधूटीविभ्रमोऽयं विडौजाः ।।८।।

द्वितीयो वन्दी—अपिच

शचीयं देवी ते निरुपममिदं नन्दनवनम् ,
निवासो देवानां मधुरसदनं चाऽव्ययपदम् ।
सुराणां कल्याणं करणमिति चित्तं प्रतिदिनम् ,
चिदानन्दे मग्नं ज्वलयति रिपूणां कुलघनम् ।।९।।

प्रथमो वन्दी—अपि च—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्योत्सवैर्नीतिविशारदोऽयम् ,
विसारिभिः स्वात्मगुणप्रकाशैः ।
प्रकाशिताशाः प्रशमादरीणा ,
मरिन्दमो मोदमनाः मरुत्वान् ॥१०॥

द्वितीयो वन्दी—एवञ्च—

सदाग्रपूजा भवतीह यस्य
यः सङ्गरे शत्रुकुलस्य हन्ता ।
यो वृत्रशत्रुः प्रथितस्त्रिलोक्यां
स देवराजो मुदमेति नित्यम् ॥११॥

यमः— देवराजो विजयते । देवेश ! भवतां प्रताप एव एतान् वन्दि-जनान् तथा तथा उपश्लोकयितुं समुत्साहयति । यतः—

अलमलमिति कृत्वा साहसं देवयुद्धे
खलदलमिति जित्वा गीयते देवराजः ।
कुलिशकलितहस्तः हस्तिजेष्ठाधिरूढः
वहति ललितलीलः नाकनाथत्वभोरम् ॥१२॥

वरुणः— युक्तमाह दक्षिणलोकपालः । सुरेश्वर !

अश्वमेधशतयज्ञविभूषण ।
सुरपतिसुरलोकसप्तासीन ॥
दैत्याब्धिनिमन्थनमथनदण्ड ।
जयतीह जगन्त्रितयेऽपि भवान् ॥१३॥

कुबेरः—एवमेव । अभिरूपैव स्तवनप्रवृत्तिः । सम्प्रति देवपतेः देवेन्द्रस्य यशसा—

निरातङ्काः लोकाः ललितललनाः लास्यनिपुणाः
वितानैर्वेतानैर्लसति मुनिसंघोऽद्य सकलः ।
समुत्सन्नारातिर्जयति सुरजातिस्त्रिभुवनम्
प्रभावोऽयं सर्वः तव तव सुराधीश विशदः ॥१४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रः— लोकपालाः ! स्वागतं भवद्भ्यः । भवतां साहाय्यम् एवास्माकमक्षयो निधिः, तदपरं करणीयं यदवशिष्टं जदपि श्रोतुं त्वरते मे चेतः ।

यमः—देवेश ! सम्प्रति—

यशो गीतं गीतं श्रवणपथपीतं भवतु ते

वरुणः—सुधर्मायामस्यां सुचरितकथा नन्दतु सदा ।

कुबेरः—भवेन्नो विघ्नानां क्वचिदपि समारम्भनिभृतम्

सर्वे—समाधाने धीराः वयमपि यतो दीव्यतु भवान् ।।१५।।

इन्द्रः—तथाऽस्तु । वन्दिन् । एतेसां लोकपालानां स्वागतं, स्वागतमिति वाचनिकेनैव न साधु इति निश्चिनुमः । तत् गान्धर्वेणाद्यथभनन्दनीया एते ।

वन्दी—यद्देवेन्द्रः समादिशति । जयतितरां देवेन्द्रः । एष गीयते—

अद्य मे मनो न रक्षति धैर्यम् ।
मन्दं मन्दं प्रवहति पवनः, रचयति मह्यं वैरम् ।।अद्य मे ··।

सुरभिसुगन्धिसुगन्धितलतिका, भ्रमरभ्रमणरवगुंजितकलिका ।
कौति कोकिलो ललितं स्वैरम् ।। अद्य मे·····।

शय्येयं सुमनोभिश्छन्ना, शोषं व्रजति भाग्यविहीना ।
नहि प्रिय ! हा पश्यसि सौन्दर्यम् ।। अद्य मे ·····।

चन्द्रमुखी मां तर्जति राका, सुधारश्मिरपि भवति शलाका ।
त्वया विना मे गतमैश्वर्यम् ।। अद्य मे·····।

इन्द्रः—स्मितं कृत्वा । गीतं हि नाम निरुपमं श्रोत्ररसायनम् । अद्य पुनः गीतकमिदमवधार्य किञ्चिदनिर्वचनीयं रणरणकमनुभवामः ।

सर्वे—देवराज ! भावभृतेय गीतिः । उत्कण्ठावाहिकेयमाकण्ठमुत्कण्ठयति सहृदयान् भावुकान् ।

इन्द्रः—अद्य चिरकालादेवं गीतं श्रुतमस्माभिः । लोकपालाः जानन्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एव भवन्तः, यत् दुर्धर्षस्य तस्य दैत्यपुङ्गवस्य उत्पातेन सर्वं विषयजातं मे विफलमिवाभूत्। सम्प्रति तद्विनाशेन किञ्चित्समुच्छ्वसिमः।

यमः—हे देवपते! न केवलं नमुचेरेव विनाशः, प्रत्युत सम्प्रति तु त्रिलोक्यां न कश्चित् तत्सगोत्रीयोऽपि श्रूयते। समूलोच्छिन्नोऽरातिरिति मन्यामहे।

वरुणः—सर्वमेवैतत् देवेन्द्रस्य अप्रतिमप्रतापविजृम्भितम्! भवतां नाम्नैव निर्भिन्ना अरातयः इति बहुशः श्रूयते दृश्यते च। तत्समराभिमुखे देवे को नाम जीवितं रक्षति।

कुवेरः—सुरेश्वर! भवतां विजयाभिनन्दिनो देवाः शुभाभिराशीराशिप्रभूताभिर्वाग्भिः शुभं कामयन्ते। अनुभवतु देवपतिः रिपुबलविजय-महोत्सवम्। वयमपि परमामोदं भजामः।

दम्भोलिदावदहनेन समस्त एव
दग्धोऽस्ति शत्रुनिचयो विजयस्तवैव।
भूयात्सदैव भवतां भजतां समृद्धिः।
देवेन्द्रः! सम्प्रति वयं मुदमावहामः॥१६॥

इन्द्रः—लोकपालाः। यद्यपि सम्प्रति नास्ति कश्चिदपि तादृश उपस्थितकार्यविशेषो येन मानसं मे सचिन्तं स्यात्, तथापि न निश्चिन्ततां वेद्मि।

वरुणः—लोकपालक! सुराधिप। इदमेव वैशिष्ट्यं श्रीमतां यदन्येषां चिन्तावितान स्वयमेवोररीकृत्य तान् निश्चिन्तान् सम्पादयन्ति। अतः सर्वमेव चिन्तितं गुरुप्रसादेन भवत्पराक्रमेण च यथा समीहितं प्रीतिप्रदं सम्पत्स्यते।

सर्वे लोकपालाः—तत्साधयामस्तावत्। अनुभवतु देवराजः शचीसाचिव्यसम्वादानन्दसन्दोहकन्दम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रः—बाढ़म्

॥ निष्क्रान्ता वरुणकुबेरयमाः ॥

इन्द्रः—इदानीमन्तःपुरमेव गत्वा सुखविहाराननुभवामः । यतः—

हृदयस्य परिस्पन्दः परमानन्दमन्दिरम् ।
एकान्त सौख्यसन्दोहः हृद्योऽसावङ्गनाजनः ॥१७॥

द्वारपाल ? अन्तःपुर-प्रवेशाय मार्गं निर्दिश ।

द्वारपालः—यद्देव आज्ञापयति । इत इतो देवः ।

॥ इन्द्रः प्रस्थितो भवति ॥

॥ ततः सशिष्यो वृहस्पतिः प्रविशति ॥

वृहस्पतिः—कः कोऽव भो; देवराजं निवेदय समुपस्थितो देवगुरुः वृहस्पतिरिति । विचिन्त्य अथ किं कोऽपि न श्रृणोति । अहा; नूनं तिरस्कृतिरेवेयम् । अन्यथा कथमेवं व्यवहृतिः स्यात् । निर्गच्छन् स्वगतम् । आह । नूनं समराङ्गण-लब्धजयः विनिहतारिः शत्रुदमनोऽयं देवेन्द्रः सम्प्रति गर्वमण्डनमण्डितहृदयो न जातु विनयं रक्षति । मयि देवगुरौ समुपस्थितेऽपि न किञ्चित् प्रस्तुतं मान्यजन-सम्मानकारकं वचनविन्यासादिकं करोति । तथाहि—

नौत्थानिकेन विधिना न नमस्यया वा
नो भाषणादिकरणेन कृतोपचारः ।
शिष्टेषु सर्वसुलभो लभते हि नात्र
दृप्तारिदृप्तविजयेन सुदर्पितोऽयम् ॥१८॥

अथ मान्येषु समुपस्थितेषु यत् औदासीन्यप्रकाशनं तन्नूनं मह-त्पातकम् । अचिरमेव स्वात्मकृतावमानकर्मविपाकं नूनमयमनुभवति ।

अहो । दर्पान्धस्त्वं यदि न मनुसे त्वामुपगतं
गुरुं मां देवानां प्रथितयशसं बृहतांपतिम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्रुवं स्वल्पैः कालैः सुकृतरहितोऽसौ युधि रुषा।
अनायास जित्वा भजतु तव राज्यं दितिसुतः ॥१९।

॥ निष्क्रान्तो वृहस्पतिः ॥

(नेपथ्ये)

[भो भो देवेन्द्र ! अद्य भगवान् वृहस्पतिः तव संसदि उपस्थितः किन्तु त्वया उचितसम्मानदानेन न सत्कृतः । इति दर्पोन्मतां विज्ञाय]

शापो दत्तस्तैः —यदचिरमेव भवन्तमनायासं जित्वा भवद्राज्यं दितिसुतः बलिः करगतं भजत्विति ।

इन्द्रः—अहो ! महान् मे प्रमादः । पूज्यपूज्योऽयं भगवान् मयावमानित इति भृशं शोचनीयम् । अतिक्रान्तसमुदाचारेण मया तस्मिन् काले यदि स भगवान् नो सम्मानितः, तदाऽयमात्मदोष एव । मान्यते । अथ किं करोमि । तत् लोकपालैः सम्मन्त्रयैव निर्णयः कार्यः । (दक्षिणहस्तमुत्थाप्य ध्यायन्) लोकपालाः समुपस्थिताः स्युः ।

(ततः यमवरुणकुबेरप्रवेशः)

यमवरुणकुबेराः— देवराजो जयति,कस्माद्वयं स्मृताः । तच्छ्रुत्वा कौतूहलं शमयितुमिच्छामः ।

इन्द्रः—लोकपालाः ! किं कथ्यते, गुरुभिः शप्ताः स्मः इत्येवमवधारयन्तु भवन्तः । तत् पूजनीयस्य गुरोरवमानः न जानता मया चरितः, किन्तु नास्ति सः कालः एतादृशप्रस्तुतप्रस्तोव्यस्य, अतः साम्प्रतिकं करणीयम् भवद्भिः सम्मन्त्र्य कर्तुमीहे । तत् यथाप्रस्तुतं विचार्य मन्त्रयन्तु भवन्तः । यतः—

समासभे मान्ये यदि न विनयेन व्यवहृतः,
तदा तेषां कोपो मयि जडमतौ जात उचितः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथातो मे राज्यं च्युतमिति न विद्मोऽद्य ह ह हा ।
गुरौ क्रोधाविष्टे सकलमपि लब्धं हि विफलम् ॥२०॥

यमः—न चापि कालः सुलभोऽतिवाह्यः,
वरुणः—प्रसादनीयो गुरुरेव सद्यः ।
कुवेरः—तथैव रक्षा भवता कृता स्यात् ,
इन्द्रः—व्रजामि शीघ्रं गुरवो हि सेव्याः ॥२१॥

॥ सर्वे निष्क्रान्ताः ॥

—०—

गुरुबृहस्पतेराश्रमः

(अमनस्कौ द्वौ शिष्यौ प्रविशतः)

प्रथमः—सखे ! अद्य भवन्मुखमण्डलं किञ्चित् सचिन्तमिव लक्ष्यते । अपि भवान् कुशली ? अथ आश्रमस्थः सर्व एव प्राणी सानन्दः ? तदुच्यताम् किमस्ति समुद्वेगकारणम् । यतः अहमपि निष्कारणं समुद्विग्नोऽस्मि ।

द्वितीयः—वयस्य । किमुच्यते । मानसं हि नाम अनागत घटनावीक्षणमन्त्रविशेषम् । तन्नूनं केनापि महता कारणेन भवितव्यम् ; यदावाम्अननुभूतपूर्वमेतादृशी मानसविह्वलताम नुभवावः । भवान् किं सम्भावयति ।

प्रथमः— आ अहं तु मन्ये यत् भवन्तं तथा दृष्ट्वा अहमपि तथैव संवृत्तः ।

द्वितीयः—नहि, नहि, सर्व एवाश्रमस्थः अथवा आश्रम एव भृशमौदासीन्यं भजति ।

प्रथमः— तत् किमथं भवान् किञ्चित् मनसि संगोप्य कथयति । एवं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नास्ति कश्चिल्लाभः। अहं तु भगवतां वाचस्पतीनां चिरकालिकीमनुपस्थितिमेव मानसोद्वेगस्य कारणं निश्चिनोमि।

द्वितीयः—साधु चिन्तितं वयस्येन। वयस्य। सत्यं गुरुविरहितोऽयमाश्रमः स्वयं मूकवेदनामाविष्करोति न खलु पूर्वमेतादृशं विलम्बितं गुरुभिः। अथ च नोपलब्धः कश्चित् तदागमनविषयक समाचारः।

(ततोऽपरशिष्यप्रवेशः)

प्रथमः—अहो सौभाग्यपरम्परा। भगवान्! आगम्यतां स्वागतं भगवते! कथयतु भवान्, क्व नु सम्प्रति गुरवोऽस्माकं ते भगवन्तो देवेज्याः।

द्वितीयः—गुरून् दिदृक्षवो वयं भृशमुत्कण्ठिताः स्मः।

समागतशिष्यः—सौम्य! किं ब्रूमः। युवां जानीथ एव यत् मया सार्धं ते भगवन्तः देवेन्द्रं द्रष्टुमितः प्रस्थिताः तत्र नोचितं सम्मानितास्ते देवेन्द्रेण। अथ भृशमवमानमननुभूतपूर्वमिति हृदा विचार्य दह्यमानकोपानलैस्तैःइन्द्रोऽभिशप्तः। यदचिरेणैव युष्मद्राज्यसुरैरासादितं स्यादिति। ततः क्षिप्रं निर्गताः वयम्।

शिष्यौ—ततस्ततः।

समागत शिष्यः—ततो वत्स। बहिरागत्य गुरुभिरुक्तोऽहम् यत् क्षणद। त्वमाश्रमं गच्छ, गच्छामो वयं तपस्यायै अस्मदनुपस्थितौ युष्माभिः संरक्षणीयः स आश्रमः इति। ततोऽहमत्र समुपस्थितोऽस्मि।

शिष्यौ-भगवन्। अनुचितमचरता देवेन्द्रेण सम्प्रति तु सर्व एव देवलोकोऽसुरेभ्यो निवेदित इति सम्भाव्यते।

समागत शिष्यः—हन्त। किं कथ्यते। इदानीं महत्संकटं समुत्पन्नमिति मन्ये। अतो गुरुभिरूपदिष्टाः स्वाध्यायप्रवचनादय एव साम्प्रतमस्माकं मार्ग-प्रदर्शकाः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रः—हन्त। ततः यविशतोन्द्रः। इन्द्रत्वमासाद्यसुखेन योऽहं, सम्पूजितो दैत्यकुलस्य हन्ता। स्वीयापराधेन समूद्चेताः, विन्दामि दैन्यं गुरूणाऽभिशप्तः॥ २२॥

तत् त एव गुरवः शरणमिति ज्ञात्वा सम्प्राप्तोऽस्मि। मन्ये गुरूणायमेवाश्रमः। यतः—अत्र समुपस्थितय—

सुखं वा दुखं वा विपदमथवा सम्पदमपि,
प्रियं वा द्वेष्यं वा हितकरमुताहोऽहितकरम्।
जितं वा जेयं वा सकलमपि भेदेन रहितम्,
भजामोऽद्वैतं भो मनसि सहसा भाति विदितम् ॥२३॥

तत् प्रविशामः। (प्रविश्य) (स्वगतम्) किं कथयेम यदि। देवेन्द्रः समायातः इत्युच्यते तदा तत्रापि दर्पगन्धः। अथ तावत् एवं कथ्यते (प्रकाशम्)।

सुरसदसि कृतोऽसौ मृदूभावेन येन,
स्वजनजनविरुद्धः शिष्टसीमातिवाही।
सकलसुरगुरूणां श्रीमतां तेऽवमानः,
प्रविशति मतिमन्दो देव। शिष्यो महेन्द्रः ॥२४॥

प्रथम शिष्यः— अहो। देवेन्द्रः समुपस्थितः।

इन्द्रः— न देवेन्द्रः। इन्द्रोऽयमुपस्थितोऽभिवादयति भवतः।

प्रथम शिष्य :— इन्द्र। स्वागतंम् भवताम्।

इन्द्रः— भगवन्। नैष कालः स्वागतस्व। भवत्स्वागतवचनेन तु सम्प्रति पश्चातापतप्तः शोचनीयोऽस्मि संवृत्तः। तन्निवेदयतु भवान् पूज्यपादेभ्यो गुरुदेवेभ्यो यदऽयमिन्द्रोऽशरणः श्रीमच्चरणदर्शनाभिलाषः द्वारि तिष्ठति।

तृतीय शिष्यः—भो देवेन्द्र। सम्प्रति त्वत्कारणात् आश्रमोऽयं गुरुभिस्त्यक्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथाहि—

तथा सुराधीश । विमानितास्ते,
विमानमार्गात्तरसावतीर्य ।
त्वं याहि सौम्य । द्रुतमाश्रमं तम्,
प्रस्थाय मां कुत्रगता न जाने ॥२५॥

इन्द्रः — हा धिक् । सर्वथानुभवामः आशाविच्छेदं विषादम् । कर्तव्यनिर्धारणेऽपि मे मतिः न प्रसरति । साधयामस्तावत् । अथ कुत्रगन्तव्यम्, किं कार्यमित्यपि न विद्मः । (स्तोकं गच्छति)

॥ मार्गे नारदप्रवेशः ॥

नारदः— कीर्तनपरः

चिदानन्दरूपं प्रभुं विश्वरूपम् ।
स्मरामो वयं श्रीपतिं केशवं तम् ॥
श्रीशं विभुं निर्गुणं साधिरूपम् ।
जपामो वयं श्रीयुतं माधवं तम् ॥
अच्युतं नाम रूपं हितं सत्स्वरूपम् ।
भजामो वयं वासुदेवं हरिं तम् ॥
नारायणं विष्णुनामामृतं तम् ।
नमामो वयं सर्वभूतात्मकं तम् ॥ २६ ॥

इन्द्रः — अये ! देवर्षिनारदोऽयं कीर्तनपरः, इत एवाभिवर्तते । तत्सपदि अग्रयानेन प्रसादनीयोऽयम् । अग्रतो गत्वा । देवर्षे ! इन्द्रोऽहं नमामि भवन्तम् ।

नारदः — इन्द्र । स्वस्ति भवद्भ्यः । सुचिराद् दृष्टाः श्रीमन्तः अपि शचीसहिताः साप्सरसः सस्वर्गीयाः लोकपालादिसमन्विताः भवन्तः कुशलिनः ।

इन्द्रः — देवर्षे ! कुतोऽद्य कुशलम् । सर्वं वृत्तमवगच्छद्भि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवद्भिः कथमेवं पृच्छ्यते। तद् देवर्षे! इदानीं भवन्त एव शरणं, शोचनीयोऽस्मि संवृत्तः।

नारदः— इन्द्र! अलं पश्चात्तापेन। पूज्योपेक्षा नाम सौभाग्यतिरस्कृतिः। तत्तु न साम्प्रतं चिन्तितुमुचितम्, किन्तु ते कर्मणा यत् समस्त एवदैवलोकश्चिन्तनीयः संवृत्तस्तदेव चिन्तनीयम्।

इन्द्रः— तदुपदिशतु भवान्, किं करणीयमिति।

नारदः— देवेन्द्र। सम्प्रति भवन्तो ब्रह्माणं भजन्तु। तत्रैव कल्याणम्। स्वस्तिभवद्भ्यः गच्छामस्तावत्। ॥ चिदानन्दरूपंमिति गानपरः नारदः परिक्रामति) इन्द्रो निष्क्रान्तः ॥

॥ इति प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

॥ सुतललोके बलिसभा ॥

[बलिः, विबाहुः, कालनेमिः, वातापिरिति दैत्यचतुष्टयी स्थिता ऽस्ति]

बलिः— अयस्माकं सुतललोकः सर्वथा प्रशस्यो विद्यते। नात्र-शोताधिक्यं, नैवात्यूष्मा। सर्वत्र सुखमेवाऽस्ति। तथापि न शाम्यति स्वर्लोकविजयाकाङ्क्षा।

कालनेमिः— दैत्यराज। जिगीषैत बलवतां जीवितसर्वस्वम्। देवैः सह शाश्वतमस्माकं वैरम्, यतो हि-ते यागादिषु स्वयं हव्यादिभागं गृह णन्ति किन्तु नास्माकं भागं दापयन्ति।

वातापिः— दैत्येश्वर! अहं तु मधुरेण व्यवहारेण महर्षीणां मधुरतमं मांसमास्वाद्य प्रभूततममानन्दं विन्दामि।

विबाहुः — दैत्याऽधिपते। यदि देवैः सह संग्रामः सुलभः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यात् तदा चिरकालिकमस्मदभिलषितं सम्पद्येत। स्वात्मकौशलं प्रदर्श्य कृतार्थमात्मानं कुर्तुमहर्निशं जाग्रत्स्वप्न सुषुप्तिष्वपि मे मनश्चेष्टते।

बलि :— वीराः! सम्यक् ज्ञायते भवतामभिलाषः। किन्तु गुरूणामादेशं पालयद्भिरस्माभिः प्रतीक्ष्यर्ते कालः। अथ नवीनः स्वर्गतः कश्चित् समाचारोऽस्ति लब्धः।

वातापि :— किं स्वर्गीयैर्वृन्तान्तैः। इदानीमिन्द्रोलब्धन-मुचिजयः प्रसन्नमानसः स्वलोकपालः अमन्दं दर्पगन्धं जिघ्रति।

विबाहु :— अलं तेषां प्रशंसया।

ये छद्मचारिणों नित्यं, मायामुग्धक्लेवराः।
स्वार्थपौषणसंलग्नाः, ते वे देवाः विगर्हिताः ॥१॥

कालनेमि :— दैत्येश्वर। श्रूयते यदयमिन्द्रस्तस्य नमुचेः व्यापादनमिच्छन् कस्यचिन् महर्षेः जीवितं याचित-वान्ः तस्य च शिरोऽस्थिभिः शस्त्रं कृत्वा सम्प्रति स्वमप्रतिमबलायुधसम्पन्नं मत्वा देवानपि तथा न मनुते।

वातापि :— भोः। न नमुचिवधाय महर्षिजीवितं, प्रत्युत महर्षिवधाय एव महर्षिजीवितमिति कथ्यताम्। यतः —

आयुधान्नां गतिर्नासीत् नमुचेः विनिपातने।
स सागरफेनेन भाग्यादिन्द्रेण हिंसितः ॥२॥।

बलि :— ननुचिवधोदन्तेन भवद्भिर्यूयः तस्य इन्द्रनाम्नो मम वैरिणः स्मृतिः बुद्धौ समुपस्थापिता। तद् विजृ-म्भते मे क्रोधानलः तमिन्द्रं दग्धुम्, किन्तु न समी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चीनोऽयमवसरः, गुरूणामादेशोऽवश्यं पालनीय इति कृत्वा स्थीयते। तथा च गुरूवरः आदेशकरणाय भृशं प्रार्थयन्ते।

विबाहुः — दैत्याधिपते। अवश्यमेव पालबीयोऽस्माभिर्गुरूणामादेशः। वेद्यं च देवचरितम्।

बलिः— वीराः तदर्थं नियोजितोऽस्ति संह्लादी।

सर्वे — बाढं भृशमुत्कंण्ठिताः स्मः॥ ततः प्रविशति संह्लादी॥

संह्लादी — विलयते दैत्याधिपतिः।

बलिः— अहो। संहलादी समुपस्थितः। संह्लादिन्। स्वागतं ते। आयाहि, कथय, कुत आयातोऽसि। चरितार्थसंज्ञिकेयं ते मुखाकृतिः॥ सर्वे संह्लादिमुखं पश्यन्ति॥

संह्लादी :— दैत्येश्वर। भवदाशीर्वादात् चिरमटाट्यमानः प्रायशः सर्वेषु लोकेषु भवद्दर्शनाय समुवस्थितोऽस्मि।

बलिः — अहो :

संह्लादिनो मुखरुचिर्वचनावली ते,
संह्लादिनी च नयने नयनाभिरामे।
संह्लादिनोवयममी भवताद्यजाताः,
संह्लादिनस्तु कथितं भवता पुरस्तात्॥३॥

संहलादी— दैत्येश्वर। श्रूयताम्, इतोऽहं लोकदिदृक्षया प्रथमं मृत्युलोकमगच्छम्।

सर्वैः— ततस्ततः।

संहलादी — तत्र सर्वत्र दृष्टमस्माभिर्यत् वराकाः मृत्युलोकवास्तव्वाः देवयजनतत्पराः सन्ति। न ते स्वबल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुद्धिवैभवादौ विश्वसन्ति ! सर्वतोभावेन देवमुखापेक्षिणस्ते ।

बलिः— अग्रे । अलम् परावलम्बिनां कथया ।

येषां नाऽस्ति पराक्रमः परमुखापेक्षा च यैर्मृग्यते ।
दैन्यानां निचयैश्च यैरविरतं मध्यस्थतासाधिता ॥
देवानां कृपयैव सर्वसुलभ येषामशेषं मतम् ।
तेषां संकथया कृतं नहि मनाङ्मे मानसं तुष्यति ॥४॥

संह्लादी — श्रुणोतु दैत्याऽधिपतिः । ततोऽहं कतिचिद्दिनानि अतिवाह्य स्वर्लोकदिदृक्षुर्देवरूपमात्मानं परिकल्प्य तत्र समुपस्थितोऽभवम् ।

विवाहुः— कथय कथय तत्र का स्थितिः देवानाम् ।

संह्लादी— सुबाहो ! किं कथ्यते ?

सर्वे सम्प्रति सानन्दाः
नन्दनोद्यानसेविनः ।
निरातङ्काः प्रमोदस्थाः
निन्दितासुरताः सुराः ॥५॥

बलिः— संह्लादिन्, किं निन्दितासु क्रियासु सुराः रताः सन्ति ?

संह्लादी— दैत्येश्वर ! निन्दितासु क्रियासु, अप्सरस्सु मिथ्याऽहंकृतिषु साम्प्रतं निमग्नाः ते दृष्टाः ।

बलिः— निपुणम् । तर्हि तेषां विनिपातोऽपि ध्रुवमेव । अन्यत् यद्दृष्टम् तदुच्यताम् ।

सह्लादी— ततो दैत्याधिराज ! एकस्मिन् दिवसे कामरूपोऽहं इन्द्रसभायां समुपस्थितोऽभूवम् ।

सर्वैः— ततस्ततः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संह्लादो — तत्र वृहस्पतिः सशिष्यः संयातः। स च इन्द्रेण कृतावमानः तस्मै शापमददत्।

सर्वेः— [दीर्घं विहस्य] श्रुतं श्रोतव्यम्, इदानीमस्माकं मनोरथाः।

सफला एव। अहो इन्द्राय शापं ददता तेनास्माकमुपकार एव कृतः।

बलिः— हन्त। प्रसन्नाः स्मः। संह्लादिन् गृह्यताम् पुरस्कृतिः। [इति पुरस्कारं ददाति] इदानीमाचार्यदर्शनमेवाऽतिसमीहितम्, [ततः शुक्राचार्यप्रवेशः]

[शुक्रं दृष्ट्वा सर्वे समुत्थाय]

सर्वेः— आचार्याः प्रणम्यन्ते।

शुक्रः— स्वस्ति।

बलिः— [बद्धाञ्जलिः] आचार्य! इदमासनमास्यताम्।

शुक्रः— बले! अलं स्थित्वा, चिराय स्थिताः स्म। अद्य स्वर्जयाय शोभनो मूहूर्तः तद् गच्छत॥

बलिः— जयति आचार्यः। आचार्यादेशादधुनैव इन्द्रलोकविजयाय प्रस्थातुकामाः स्मः।

शुक्रः— स्वस्त्यस्तु [शुक्रः निष्क्रान्तः]

बलिः— यागात्प्राप्तसमुद्भवोऽद्भुतरयः सज्जो रथः स्थाप्यतां।

कालनेमिः— देवानां विजयक्षमं निरुपमं शस्त्रं समानीयताम्।

विवाहुः— बाहुर्मे बलशालिनां विदलने लब्धोत्सवाद् दीव्यताम्।

वातापिः— संग्रामे त्वरते स्थितिं न सहते सज्जं धनुर्दीयताम्॥६॥

॥ इति द्वितीयोऽङ्कः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

।। अथ तृतीयोऽङ्कः ।।

[खिन्नः सलोकपालः इन्द्रः प्रविशति । इन्द्रो हस्तौ संयोज्य प्रार्थयते]

इन्द्रः— हे निखिलचराचरसृष्टः कर्मविपाकात्, गुरुकोपात्
बलिना भृशं पराभूताः संप्रार्थयामो वयम् ।
हस्तो विश्वविचित्रचित्ररचने ख्यातोऽस्ति वामेतरः
वाणी ते वरदायिनी भगवती वेदत्रयीपीठिका ।
सौम्येयं सुखदा सुधेव मधुरा दिव्याकृतिर्ध्यायताम
अस्माकं कुरुतात् सहायमधुना धातर्विधेया वयम् ।

अपि च— स्वर्णादि-सौभाग्य-परम्पराभ्यः
भृष्टा वयं दैन्यसमावृताश्च ।
संप्रार्थयामो दनुजैः परास्ताः
अब्जोद्भव त्वां शरणं शरण्याः ।।८।।

[ततः ब्रह्मा प्रकटीभूतः]

ब्रह्माः— इन्द्र ! स्वस्त्यतु । अवगच्छामो वां मनोरथान् तदर्थं सम्प्रति भगवन्तं विष्णुमेव प्रसादयामः । अतः क्षीरार्णव एव गन्तव्यः । भवन्तः सर्व एव अनुगच्छेयुः । ।। सर्वैः देवैः सह ब्रह्मणः क्षीरार्णवं प्रति प्रस्थानम् क्षीरार्णवं प्राप्य ।।

सर्वैः— ॐ नमो भगवते वासुदेवाय ।

ब्रह्माः— [प्रार्थयते]
निवासः क्षीराब्धिः शयनमृदुलोऽसावहिपतिः
सदा वामे लक्ष्मीर्लसति सुभगा साऽपि परमा ।
तदेतत्सर्वं वै निरवधि जगन्नाथ ! रुचिरं
तथापि प्रीतिस्ते शरणगतसंरक्षणपरा ।।९।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवञ्च नाथ ! स्वामिन् । करुणाकलितात्मन् । सुर-
रिपो ! विभो ! पुण्यश्लोक ! श्रुतिमहित ! सैसेवित !
सुरैः ।
गुरूणाँ संकोपात् दनुजवलिना नष्टविभवाः ।
समायाताः देवाः शरणमधुना देव ! भवताम् ॥१०।

विष्णुः— ब्रह्मन् ! स्वागतं भवताम्, अयं महेन्द्रः पूज्यानामपि सदर्प-
मवहेलां करोति । तस्यैव फलं सम्प्रति नेकोऽनुभवति प्रत्युत
सर्व एव देवलोकः संकटापन्नः ।
गुरूणामवमानेन धनधान्यं तथा यशः ।
राज्यं कलत्रं सर्वं हि नष्टं भ्रष्टं हतं गतम् ॥
तेन कारणेन हे देवेन्द्र ! मदीयं वचनं कुरु । कार्यहेतोस्त्वया
दैत्यैः समागमः कर्तव्यः । ततः काले पुनः—ते भविष्यति
समीहितराज्यलाभः ।

सर्वः— ॐ नमो भगवते वासुदेवाय ।
(विष्णुमभिवाद्य प्रस्थितास्सर्वे)
[स्वर्गस्थो बलिः ससहायः प्रविशति]

बलिः— वीराः ! समीहितलाभेन नूनममन्दमानन्दं विन्दति नश्चेतः ।

विबाहुः—दैत्येश्वर !! किं कथयामः सर्वं सम्पन्नमाचार्यस्य शुभाशी-
र्वचसा, भवतां पराक्रमेण च ।

कालनेमिः-दैत्याधिप ! भवत्प्रताप एव जागर्ति सम्प्रति समस्तेऽपि स्वर्गे ।

बलिः— तथापि न ज्ञायते केन कारणेन स ऐरावतनामा हस्ती,
उच्चैश्रवानामकोऽश्वः बहून्यन्यान्यपि रत्नानि तथा सा
शची न मेऽधिगता ततो मे मानसं किञ्चिद् दूयते ।

विबाहुः—दैत्येश्वर ! नात्र विचारः कार्यः । आचार्याः प्रष्टव्याः ।

बलिः— बाढम् । आचार्यं द्रष्टुं बलीयान् मनोरथः
[ततः प्रविशति शुक्राचार्यः]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वैः— आचार्य ! अभिवादयामो वयम् ।

शुक्रः— स्वस्ति ।

बलिः— आचार्य । लब्धमस्माभिरनायासेनैव भवत्प्रसादात् स्वर्ग-साम्राज्यम्, पराजिताः देवाः पलाप्य पातालवसतयो जाताः, किन्तु साम्राज्यफलं नोपलब्धमस्माभिरिति मे क्षोभः ।

शुक्रः— बले ! तव कथितमर्थतो विभावयामः । किन्तु यत् सत्यं तच्छृणु । इन्द्रोपभोग्यानि वस्तूनि न यथा तथा सुलभानि । प्रत्युत सुदुर्लभानि । अश्वमेधानां शतेन याजक एव तत्सर्वं भुनक्ति । अतः न तादृशं त्वदीयं सुकृतमिति जानीहि ।

बलिः— [मौनमवलम्बते]

शुक्रः— स्वस्त्यस्तु व्रजामस्तावत् ।

[सर्वे समुत्थाय]

सर्वैः— आचार्य । नमोऽस्तु । [शुक्रः निष्क्रान्तः]

[ततः संह्लादी प्रविशति]

संह्लादीः—जयतु दैत्येश्वरः ! [ससम्भ्रमम्]

बलिः— संह्लादिन् ! कथय । किमस्ति संभ्रमकारणम् ।

संह्लादीः—दैत्यराज ! श्रुतम्, पातालात् सलोकपालः ससैन्यश्चेन्द्रः स्वर्गं प्रति प्रस्थितः इत आयाति ।

बलिः— संह्लादिन् ! अलं संभ्रमेण ।

यावत्प्राणान् बलिं जेतुम्
न शक्ताः देवयोनयः ।
वराकोऽसौ महेन्द्रोऽपि,
ससैन्यः किं करिष्यति ।।।२।।

तथापि सावधानाः स्मः ।

[ततः सलोकपालः इन्द्रः प्रविशति]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बलिः— इन्द्र ! कथय कस्मात् तेऽत्रागमनम् । सुतललोकः कथं विस्मृतः शीघ्रमपसर । तदा तु नो व्यापादितो मया किन्तु साम्प्रतं न कोऽपि ते रक्षिता ।

[इति शस्त्रमुद्यम्य प्रहरन्निच्छति] अये ! कथं मे शस्त्रस्तम्भनम् ।

[नारद प्रवेशः]

नारदः — वले ! विस्मृतात्माऽसि, किमकार्यं करोषि ।
शरणागतपालनं हि वीराणां धर्मः ।
सोऽयमिन्द्रस्ते शरणागतः ।
सम्माननीयोऽयमतिथिरातिथेयक्रियया ।

बलिः — [शस्त्रमवष्टंभ्य विचिन्त्य]
किम् शरणागतोऽसौ ! भवतः कथनान्न व्यापादयाम्येनम् ।

नारदः — सुष्ठु एष एव वीराणामादर्शः [नारदो निष्क्रान्तः]

बलिः — इन्द्र ! वलिशरणापन्नस्य सलोकपालस्य ते न भयम् । आस्यतामासने ।

इन्द्रः — यदाह दनुजपालः ।। उपविशति सलोकपालः ।।

बलिः — इन्द्र ! केन मनोरथेन त्वमत्रागतोऽसीति विचार्यापि कारणं न वेद्मि । यतो मायिकस्त्वम्, नूनमत्राषि कश्चिद्रहस्यविशेषः सम्भाव्यते ।

इन्द्रः — बले ! न सर्वत्र रहस्यविशेषः । पश्यतु भवान् ।
वयं कश्यपदायादाः । असमीचीनमस्माकं परस्परं युद्धम् । यतोहि सर्वमपि राज्यादिकमस्थायि । अतः स्नेहेन परस्परं व्यवहार्यमिति शुभेच्छया संम्प्राप्ताःस्मः ।

बलिः — यदीत्थं, तदागुणितोत्साहेन ते स्वागतं कुर्मः ।

बलिः — इन्द्र ! इदं स्वर्गीयं साम्राज्यमस्माभिरधिगतमवाप्तं च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किन्तु साम्राज्यलक्ष्मीः तथा त्वदायत्तानि रत्नादीनि नोपलब्धानि ।

इन्द्रः — बले ! तदर्थमस्माभिः समुद्रो मन्थनीयः । यतो हि सर्वाणि तद्रत्नादीनि समुद्रे पतितानि इति श्रूयते ।

बलिः — किं समुद्रो मन्थनीयः । कथं तत् सेत्स्यति ।

[आकाशवाणी]

हे दनुजा ! देवाश्च! युष्माभिः समुद्रो मन्थनीयः । तेन युष्माकं कल्याणं यशोवृद्धिश्च भविष्यति । अमृतं लप्स्यते । भूयांसि च रत्नादीनि ।

बलिः— बाढम् । वीराः ! चलत; देवाः ! भवन्तोऽपि चलन्तु । अवश्यमेव मन्थनीयः समुद्रः [सर्वे समुद्रसमीपमागच्छन्ति]

बलिः — कथं मन्थनं विधास्यामः [चिन्तयन्ति]

[विष्णोः प्राकट्यम्]

विष्णुः — देवाः दनुजाश्च ! समुद्रमथने वासुकिः रज्जुः, तथा मन्दराचलो मन्थनदण्डः कार्यः ।

सर्वे — शोभनं तथैव क्रियते ।

बलिः — वयं देवेभ्यः श्रेष्ठाः । अतः वासुकेर्मुखभागस्य ग्रहीतारः । देवाः ! यूयं पृष्ठभागं गृहणीत ।

देवाः — तथास्तु

विष्णुः— गच्छन्तु भवन्तः समीहितलाभाय ।

एवं गच्छामः [सर्वे निष्क्रान्ताः]

[ततः प्रविशति विबाहुः]

विबाहुः—आश्चर्यं भोः ! वंचिताः स्म वयं देवैः । वासुकेः मुखभागग्रहणेन । ओह ! तत्सहस्रमुखगह्वरात् विनिःसृतेन विषमज्वलनानलफूत्कारेण वयं पुनः दग्धा एव । न विद्मः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्याशीर्वचसा रक्षितोऽद्य दानवलोकः ।

[मुखं विकृतं विधाय]

यदैव तस्य महाविषसर्वस्य मुखभागं निगृह्य वयं मन्दराचलमथनदण्डसंचालनाय सन्नद्धा अभवाम तदैव तेन तादृशः फूत्कारो निःस्यूतः येन दग्धप्राया एव सर्वेषामस्माकं कलेवराः ।

अ ह ह । एषाऽस्ति तस्य फणिनो फूत्कारसम्पादितहस्तदशा [हस्तं प्रदर्शयति] [आकाशं दृष्ट्वा]

अरे किं कथयत । अस्माभिरेव स्वीकृतो मुखभाग इति । भो भो पापाः ! युष्माभिरस्मत्कथनं कथं न स्वीकृतम्, अन्यत्र सर्वत्र तु कलहः । केवलमत्रैव सम्मतिः । अवगतं तेऽभिलषितं भवतु, यद्भूतम् , तद् भूतम्, वयं युस्मानिव फूत्कारानलानपि बहुमन्यामहे । ऐषोऽत्र परित्यज्यते जीवितसन्देहः । न फूत्कारोऽपि किंचित्करोऽस्माकं तथापि प्रवंचनापण्डितैर्युष्माभिर्यदि पुनः काचित् विपत्तिरस्मभ्यं समुपस्थापिता स्यात् तदा नूनं भङ्क्ष्यते सन्धिः तत् किं कुर्मः । [विचार्य] बाढम्, गत्वा मन्थन एव सम्मिलिताः भवामः, अन्यथा हस्तहानिस्तु जातैव, अमृतभागहानिरपि भविष्यति ।

[निष्क्रान्तः]

[इति तृतीयोऽङ्कः]

[अथ चतुर्थोऽङ्कः]

[नेपथ्ये दुन्दुभिध्वनिः ततो विचित्रवेषः वैतालिकः प्रविशति]

वैतालिकः—आह ! प्रलयकालध्वनिरिव श्रूयते [आकाशं दृष्ट्वा] अवगतम् अमृतप्राप्तये देवैः दनुजैश्च समुद्रो मथ्यते, यथाश्रुतम् समुद्रमन्थनात्प्रथमं विषं निर्गतम्, यच्चण शङ्करे पीतं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदनु चन्द्रकामधेनु-कल्प-वृक्षपारिजाताम्र-कौस्तुभवारुणी-विजयालशुनादीन्यनेकानि रत्नानि समुद्गतानि। किन्तु इदानीं यावत् अमृतं न निर्गतम् अत एव अविरतं प्रचलति समुद्रमन्थनक्रिया। तस्यैव ध्वनिः श्रूयते, अहमपि तत्रैव समुद्रमन्थनं द्रष्टुं यामि।

[ततः सामृतकलशहस्तधन्वन्तरिप्रवेशः]

सर्वे — देवाः दनुजाश्च-अहो लब्धममृतम्।

धन्वन्तरिः — देवाः दनुजाश्च! सफलोऽयं भवतामुद्यमः सामृत-कलशहस्तः समुपस्थितोऽहम्, किन्तु मर्त्या अपि भवद्भिरुप-करणीया इति विचार्य प्रथममहं कलशमिमं मर्त्यलोके तीर्थं चतुष्के स्थापयामि। यथाकालं सुस्नाताः मानवाः अमृतत्व-भाजः भविष्यन्ति।

सर्वे — शोभनं शोभनं शीघ्रं तथा विधीयताम्। [धन्वन्तरिः स्तोकं गत्वा] अहो! सुशान्तोऽयं प्रदेशः शैत्यपावनत्वविशिष्टोऽसौ भूभागः। नूनमेषो हरिद्वारनाम तीर्थविशेषः। अत्र हि–

इयं दिव्या गङ्गा लसति गतिशीला हि परमा
वहन्ती स्वच्छन्दं विमलमधुमिश्रं हिममयम्।
जलं यज्जीवानां दुरितदलने ख्यातनिपुणम्
सुसेव्योऽयं देशो जयति सविशेषो हरिरसौ ॥७॥

तदत्र स्थापनीयोऽसौ कुम्भः। अवश्यमेव सोऽयं तीर्थविशेषो हरिद्वारनाम्ना हरिप्राप्तौ द्वारम् भविष्यतीति मे वचनम्।

अहह! कुम्भादकस्मादुद्गतामृतविन्दवोऽत्र तीर्थे मिलिताः मे कथनं प्रमाणयन्ति :

नमोऽस्तु भवत्वत्र प्रतिद्वादशवर्षकम् कुम्भपर्व।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदग्रे गच्छामः [स्तोकं गत्वा]

बलिः — अये प्रादुर्भूतमात्रम् एव सुधाकुम्भं गृहीत्वा न जाने क्वगतो धन्वन्तरिः। हरिद्वारं प्राप्य दक्षिणदिशि गतः इति तर्क्यते। अतस्तामेव दिशं साधयामः।

धन्वन्तरिः – हन्त। आसादितोऽयं भारतवर्षस्य त्र्यम्बकक्षेत्र-विशेषः। अपूर्वैव दृश्यते अत्रत्य च्छाया, मन्यामहे नितान्त पुण्यप्रचयाञ्चितोऽसौ भूभागः। अत्र सुतरामेव समाधि-मच्चेतो भविता यतोहि—

समस्त सांसरिकसौख्ययुक्तः
　　विमुक्तभुक्तोऽपि विमुक्तिदायी।
सदैव सेव्यः पुरुषैर्यतोऽसौ
　　पवित्रनासिक्यविशेषनामा ॥८॥

नूनमत्र कुम्भपीयूषबिन्दवो भविष्यन्ति मर्त्यानां सेवित-तीर्थानां श्रौतस्मार्तक्रियातत्पराणां जनानां जीवनमहौषधयः। अतो गौतमीपाविततटेऽवश्यं स्थाप्यते त्र्यम्बकक्षेत्रे सुधा-कणिका।

[अमृतं सिञ्चति]

अस्मान्मुहूर्तात् प्रतिद्वादशवर्षं भविष्यति कुम्भ-महोत्सवः। यदवसरेऽत्र स्नाता आचान्ताः सेवितसुतीर्थाः जनाः प्राप्स्यन्ति मनोरथेन सहैव जीवनमुक्तस्वरूपम्।
[अतोऽप्यग्रे पश्यामः] [स्तोकं गत्वा]

बलिः— अहो! प्रवञ्चना, धन्वन्तरेः। कृतश्रमैरप्यस्माभिर्न प्राप्तः ससुधाकुम्भः धन्वन्तरिः। भवतु मद्वचनादादिश्यन्तां निशा-चराः प्रतिदिशं प्रतिकोणं धन्वन्तरिमन्वेष्टुम्। वयमपि बद्ध-परिकरा अस्मात् क्षेत्रात् गच्छामः।

धन्वन्तरिः-अहो सुरम्योऽयं देशः, नूनमियमवन्तीषूज्जयिनीनामनगरी,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यादृशी सुरससुरभिसुखसन्दोहसमुज्वलेयं भूमिः तादृशी न क्वचिदपि दृष्टा। सुविख्यातनामिकेयं शिप्रा क्षिप्रगामिनी सती दुरितान्यप्याशु क्षिपति।

एषा हि—

बहुजन बहुमान्या वन्दनीयाऽस्ति लोके
बहु-यजनसमृद्ध्या गीयते तीर्थराजः।
भवति विगतपापो भूरिभाग्यैर्महात्मा,
लसति तनुविचित्रा क्षिप्रधारा हि शिप्रा ॥९॥

ततोऽत्र संस्थाप्य कुम्भं क्षणं विरम्य गन्तव्यम्। [स्थित्वा] कुम्भात् निक्षेपणीयोऽमृतविन्दुः [निक्षिपति] अत्रविश्राम-जुषां तीर्थसेविनाममृतत्वलाभोऽनेन भविष्यति। नूनमत्राऽपि प्रतिद्वादशवर्षं कुम्भमहोत्सवः संपत्स्यते। इदानीं व्रजामः

[स्तोकं गत्वा]

बलिः— अहो वैदिकधर्मं प्रचारयन् मर्त्यानप्यभीष्टकामान् कुर्वाणः धूर्तराजः सः मद्भयात् न जाने कुत्र पलायितः। मद्दृष्टया निःसृत्य कोऽपि कुत्राऽपि गन्तुन्न समर्थः। सद्य एवान्विष्ये।

[स्तोकं गत्वा]

अन्वन्तरिः— अयं प्रयागः तीर्थराजोप्येषः, भगवती गङ्गा, भानुजा यमुना, सरस्वती चात्र सम्मील्य संगमनामाऽपूर्वः कोऽपि मूर्तधर्मः सम्भवति तथाहि—

सरस्वत्यसार्धं तरणितनयेथं त्रिपथगा
वहन्तीमाः सर्वाः सुचरितपताकाः दिवि यथा।
यदुत्सङ्गे स्थित्या त्रिविधभवतापस्य शमनः
प्रयागस्तीर्थानामधिपपदवीको विजयते ॥ १० ॥

अहो। धन्या प्रयागस्याऽस्य शोभा। तदत्र त्रिवेण्यां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थाप्यते मयात्र कलशः। माघे मासेऽमायां त्रिवेणीस्नानेन मानवाः विगतकल्मषाः भविष्यन्ति। प्रतिषष्ठवर्षं प्रतिद्वादशवर्षं च माघेऽमायामत्र यथाझमर्घंकुम्भपूर्णकुम्भनामकम् पर्वद्वयं भविष्यति। नूनं तदा तीर्थराजोऽयं स्वीयं माहात्म्यं प्रकाश्य प्रदास्यति स्नातेभ्योऽमृतत्वम् ।

[आत्मगतम्] इदानीमयं कुम्भः समर्पणीयः देवेभ्यः। भो देवाः ! दनुजाश्च ! गृहणन्तु भवन्तः कलशम् ।

[सर्वे देवाः देत्याश्च धावन्ति]

धन्वन्तरि–भवन्तः न पात्रमेतस्य । अतः पात्रतां विचार्य कुम्भं प्रदास्यामि ।

देवाः-- विष्णुरेव कुम्भग्रहणेऽर्हः ।

धन्वन्तरि–गृह्यतां सादरम् ।

विष्णुः— यद्येवं गृह्णामि ।

धन्वन्तरि–[निष्क्रान्तः]

[विष्णुममृतकुम्भहस्तं दृष्ट्वा दैत्याः कुप्यन्ति]

बलिः— विष्णो ! बाहूभ्यामुपार्जितमिदममृतं विभज्यैवाऽस्मभ्यं भवान् भवतु समदृष्टिः ।

अन्यथा.....

विष्णुः—बले ! मा उत्ताम्य ! न केवलं मदीयमिदं नैव युष्मदीयं प्रत्युत समेषामस्माकं युष्माकञ्च । तत् विधिना प्राशनीयमिदम् ।

सर्वे राक्षसाः—कः पुनः विधिः ।

विष्णुः— दिनत्रयमुपोष्य स्नात्वा सम्पूज्य साधुजनान् ग्रह्णीयमिदम् ।

बलिः— हे इन्द्र ! न मे त्रिविष्टपेन किञ्चित् कार्यम्, त्वं गृहाण-स्वीयं साम्राज्यं, केवलं देहि मेऽमृतम् ।

इन्द्रः— बले ! शोभनम् ! गच्छामो वयं स्वर्पालिनाय भगवतोक्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विधानेन युष्मभ्यं लप्स्यतेऽमृतम् । तद् भगवतः कथनं परिपालनीयं सर्वैरेवामृतकामैः ।

बलिः— वयं तथा कर्तुं गच्छामः । समये न विस्मरणीया वयम् ।

[दैत्याः निष्क्रान्ताः]

इन्द्रः— देवाः गच्छन्तु भवन्तोऽपि नियमसम्पादनाय ।

देवाः— बाढम् । [देवाः निष्क्राम्ताः]

विष्णुः— इन्द्र ! लब्धं त्वया स्वर्गशासनं देवैश्चामृतम् । इत्थं गुरुकोपोऽप्युपकारक एव इति जानीहि । अथ पश्य समागतं वृहस्पतिम् ।

इन्द्र :— भगवन् ।

क्षमा भूषा येषां हृदयमथ कारुण्यकलितम्,
प्रसादः कोपो वा भवति परिणामे हितवहः ।
ध्रुवं तेषां प्राप्त्या सकलमधुना मेऽस्ति सुकृतम्,
अहो कल्याणानां निरुषममिदं स्याद् विलसितम् ॥११॥

गुरो ! नमोऽस्तु । [साष्टाङ्गं प्रणमति]

वृहस्पतिः—स्वस्ति । वत्स एधस्व विनयैः

विष्णुः — इन्द्र ! अन्यत्ते प्रियं किं करवाणि ।

इन्द्रः — भगवन् ! भवतां प्रसादेन सहैव गुरुकृपा चिरस्थायिनी स्यात् तथा च—

[भरतवाक्यम्]

देवाः सन्तु हविर्भुजो हि नितरां स्वस्थाः प्रसन्नास्तथा ।
दैत्यानां निचयोऽपि वैररहितो भूयादवः संस्थितः ॥
मर्त्यास्ते च शुभान्विताः भगवतः पादारविन्दैर्मुदा ।
स्मृत्वा वित्तकलत्रसन्ततियुताः विन्दन्तु दिव्यं फलम् ।१२।

विष्णुः — एवमस्तु ।

[इति चतुर्थोऽङ्कः]

[इति कुम्भसमुद्भवं नाम नाटकम्]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ शान्ति

जिन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

—\

न्द्र ! अत

हैव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri